कारकचक्रम्

१३१





१

(क)

श्रीकृष्णायनमः॥ प्रयोगमुखतन्त्रात्तु ज्ञेयं कारकमादितः संज्ञया षड्विधं
भेदास्त्रयोविंशतिधापुनः तत्र पंचविधः कर्त्ता कर्म सप्तविधं भवेत् कर
णंद्विविधंचैवसंप्रदानंत्रिधामतं २ अपादानंद्विधाचैवतथाधारश्चतु
र्विधा करोतिकारकंसर्वंतत्त्वतश्त्वविवक्षया ३ तत्रकर्त्तर्यभिहितेप्रथमै ५
वविधीयते तृतीयाचाथवाषष्ठीस्मृतानभिहितेद्विधा ४ तथाकर्मण्य
भिहितेविभक्तिर्वृद्धिपूर्विका अनुक्तेप्रथमांहित्वापंचमीसप्तमीतथा ५
तृतीयापंचमीचैवषष्ठीचकरणेत्रिधा षष्ठीचतुर्थीतृतीयासंप्रदाने
तथात्रिधा ६ पंचमीखल्वपादानेवर्त्ततेनततोऽन्यथा सप्तम्येवाधिक
रणेकारकस्यैषसंग्रहः ७ समासस्तद्धितस्तिङ् कृत्तेचत्वारोभिधायकाः

१

तएवानभिसंबंधाद्भवंत्यनभिधायकाः ८ षट्समासश्चसंज्ञेयादृष्टा
विंशतिधापुनः नित्यानित्यत्वयोगेनलुगलुक्तोनचद्विधा ९ तत्राष्ट
धातत्पुरुषःसप्तधाकर्मधारयः सप्तधाचबहुव्रीहिर्द्विगुराभाषितो
द्विधा १० द्वंद्वश्चतुर्विधोज्ञेयोऽव्ययीभावोद्विधामतः तेषांपुनःसमासा
नांप्राधान्यंस्याच्चतुर्विधं ११ सामान्याव्ययभावाख्यास्त्रिविधस्तद्धिता
मताः पदानांतुसमर्थानांप्रथमाद्याप्रसूयत १२ तिङांचनवपूर्वार्द्ध
त्वादेषएवपरोद्विधा परस्मैपदमाख्यातंतङानावात्मनेपदं १३ परस्मै
चात्मनेभागेवचनानित्रिधात्रिधा त्रयस्तेपुरुषाज्ञेयाः प्रथमोत्तमम
ध्यमाः १४ एकद्विबहुसंज्ञानिपदान्येकैकशस्तिङः परस्मैकर्तरिज्ञेयं

नभावेनापिकर्मणि १५ आत्मनेतुत्रिषुज्ञेयंभावेकर्त्तरिकर्मणि धातोर
कर्मकाद्भावेप्रथमैकवचनंतथा १६ सकर्माकर्मकाद्धातोःकर्त्तरिस्मृत
मात्मनेपदंतुकर्मणिनिर्दिष्टंक्रियतेतत्सकर्मकात् १७ नाम्न्येवसंनियो
क्त्व्यःप्रथमःपुरुषोभवेत् त्वंयुवांयूयमित्येभिस्त्रिभिरेवतुमध्यमः १८
अहमावांवयंत्वेभिरुत्तमोनान्यथामतः अन्यथाचप्रहासेस्यात्त्वंमन्ये
हंचमोदसे १९ कृतस्त्रिष्वपिवर्त्ततेभावेकर्त्तरिकर्मणि अजवृत्तु
टक्तितृघञ्भावेयुजकारोङचानवर्णिताः २० त्रिषुगत्यर्थकादिभ्यः
तथाचैवापिकर्मणि अकर्मकात्समुत्पन्नोवर्त्ततेकर्तृभावयोः २१ इष्णु
वक्तवत्विचत्तनक्तप्मक्वरचषाकनस्नुणिन्यचः उकाराणांवुकञ्ठ

१ हेतुकर्त्ता २ कर्मकर्त्ता ३ अभिहितकर्त्ता ४ अनभिहितकर्त्ता ५ चेति तत्र स्वतंत्रकर्त्ता ६

कचटकादयः कर्त्तरि स्मृताः २२ भावे चोत्तरकाले ऽन्यपूर्वमन स्त्वाः पूर्वकालजाः कर्मणि प्रत्ययमात्रे षांद्धि ती धातुविशेषतः २३ वर्त्तमाने तु निर्दिशे वर्त्तते शत्तृशानचौ तव्यसत्संज्ञकाय्व्या अन्समासेन तु सिद्ध्यति २४ गंयना दाशयेनाहं श्लोकानां पंचविंशपरायमारमुद्धृ ढुं पेवियं भवेभवे म २५ इति श्रीवररुचिकृतं कारकं च नाम समाप्तं॥ तत्र पंचविधः कर्त्तरि स्वतंत्रकर्त्ता यथा पुण्यं करोति देवदत्तः हेतुकर्त्ता यथा गच्छति शिष्यो ग्रामम् गमयति शिष्यं ग्रामं गुरुः कर्मकर्त्ता यथा स्वयमेव पच्यते कुशलबुद्धिः अभिहितकर्त्ता यथा ग्रामं गच्छति पुरुषः अनभिहितकर्त्ता यथा लोकः क्रियते विष्णुना कर्म सत्त्वविधम् इप्सितम् १ अनीप्सितम् ईप्सितानी

प्सितम् ३ अकथितम् ४ कर्तृकर्म ५ अभिहितंकर्म ६ अनभिहि
तंकर्म ७ चेति तत्र ईप्सितंकर्मयथा ओदनंभुङ्क्ते मनुष्यः अनीप्सि
तंकर्मयथा विषंभक्षयति रुद्रः ईप्सितानीप्सितंकर्मयथा पायसं
भक्षयन तत्रपतितंरजोभक्षयतिवालकः अकथितंकर्मयथा गांदो
ग्धिपयोगोपालः कर्तृकर्मयथा गमयतिपुत्रंग्रामंपिता अभिहितं
कर्मयथा घटः क्रियतेदेवदत्तेन अनभितंकर्मयथा ओदनंपचति
सूपकः १ द्विविधंकरणं वाह्यमाभ्यंतरंचेति शरीरावयवाद्यन्य
द्वाह्यम् शरीरावयवाभ्यंतरम् वाह्यकरणंयथा दात्रेणलु
नातिव्रीहिन्कर्मकारः आभ्यंतरंकरणंयथा चक्षुषारूपंगृह्णाति

नि

नरः त्रिविधं संप्रदानम् प्रेरकम् १ अनुमन्तृकम् २ अनिराकर्तृकं
३ चेति प्रेरकं संप्रदानं यथा ब्राह्मणाय गां दिशति धार्मिकः अनुम
न्तृकं संप्रदानं यथा अतिथये हस्तमूलं ददाति सत्पुरुषः अनिराक
र्तृकं संप्रदानं यथा पुरुषोत्तमाय पुष्पं ददाति सुजनः द्विधमपादा
नं चलम् अचलं चेति चलमपादानं यथा धावतो हस्तिनः पतत्यंक
शधारकः अचलमपादानं यथा पर्वतादवतरति मुनिः चतु
र्विधमधिकरणम् अभिव्यापिकम् औपश्लेषिकम् वैषयिकम् सा
मीपिकम् तत्र अभिव्यापिकमधिकरणं यथा तिलेषु तैलं वर्तते औ
पश्लेषिकमधिकरणं यथा आस्ते कटे देवदत्तः वैषयिकमधिकर

णं यथा वने शार्दूलस्तिष्ठति सामीपिकमधिकरणं यथा गंगायां वसति घो-
षः नदीतीरे वसतीत्यर्थः करोतीति कारकमिति व्युत्पत्त्या कर्त्तैव कारकसं-
ज्ञो भवति न तु कर्मादि इत्याशंक्याह सर्वामिति तेपि स्वोतत्स्वविवक्ष-
याकर्त्तृसंज्ञां भवंतीति तेषामपि कारकत्वं सिद्धमिति तत्र कर्त्तरीति अभि-
हिते कर्त्तरि प्रथमा भवति यथा ओदनं पचति देवदत्तः अनभिहितेक-
र्त्तरि तृतीया भवति सा यथा लोकः क्रियते विष्णुना षष्ठी च यथा वैष्णव-
स्य वैष्णवेन वा सेव्यो हरिः तत्पेति अभिहिते कर्मणि प्रथमैव भवति यथा
विष्णुना क्रियते लोकः अनभिहिते कर्मणि द्वितीयातृतीया चतुर्थी षष्ठी
चेति चतस्रो भवंति द्वितीया यथा ग्रामं गच्छति नरः तृतीयया पुत्रेण सं-

जानीते पिता चतुर्थी यथा ग्रामाव्रजति पुरुषः षष्ठी यथा ग्रामस्य गंता दे
वदत्तः तृतीयेति करणे तृतीया पंचमी षष्ठी चेतितिस्त्रो भवंति तृतीया यथा
चक्रेण सुरं छिनत्ति हरिः पंचमी यथा स्तोकान्मुक्तः षष्ठी यथा घृतस्य सं
जानीते मित्रम् षष्ठीति संप्रदाने षष्ठी चतुर्थी तृतीया चेतितिस्त्रो भवंति ष
ष्ठी यथा पुरुषमगच्छं दूमस्तोदातव्यः चतुर्थी यथा तृषितायान्नं ददाति
देवदत्तः तृतीया यथा दास्या माल्लांदिशति कामुकः पंचमीति अपादाने
पंचम्यं भवति नान्या यथा नीपादवतरति कृष्णः सप्तमीति अधिकरणे स
प्तम्यं भवति नान्या यथा व्रजे वसति कृष्णः इति कारक संक्षेपः अथ स
मासः षोढेति समासः संक्षेपात् षोढा पुनः अष्टाविंशति धा नित्य त्वेमानि

त्पत्वे च भेदे तद्द्विविधो भवति लुगलुक्केन च द्विविधो भवति तत्र नित्यस
मासो यथा प्रचुरः अनित्यसमासो यथा ब्राह्मणकंबलः लुक्समासो य
था कृष्णाश्रितः अलुक्समासो यथा कंठेगरः तत्राद्यो तत्पुरुषः यथा
१ पूर्वं कायस्य पूर्वकायः कृष्णमाश्रितः कृष्णाश्रितः २ शंकुलया खंडः शं
कुलाखंडः ३ कुंडलाय हिरण्यम् कुंडलहिरण्यम् ४ सिंहाद्भयं सिंहभय
म् ५ कद्वस्य मूलम् ६ अक्षेषु शौंडः अक्षशौंडः ७ न ब्राह्मणः अब्राह्मणः
८ सप्तधा कर्मधारय विशेषणपूर्वपदः १ विशेष्यपूर्वपदः २ विशेषणो
भयपदः ३ उपमानपूर्वपदः ४ उपमानोत्तरपदः ५ संभवनापूर्वपदः
६ अवधारणपूर्वपदः ७ इति सप्तधा कर्मधारयो भवति तत्र विष

णपूर्वपूर्वपदो यथा नीलं चैतदुत्पलं च नीलोत्पलम् विशेष्यपूर्वपदो यथा
वैयाकरणश्चासौ खसूचिश्च वैयाकरणखसूचिः विशेषणोभयपदो
यथा शीतं चैतदुष्णं च शीतोष्णम् उपमानपूर्वपदो यथा शंख इव पाण्डुः
शंखपाण्डुः उपमानोत्तरपदो यथा पुरुषो व्याघ्र इव पुरुषव्याघ्रः संभावना
पूर्वपदो यथा गुड इव बुद्धि अवधारणपूर्वपदो यथा गुण एव धनं गु
णधनम् सप्तधा च बहुव्रीहि द्विपदः १ बहुपदः २ संख्योत्तरपद ३ संख्यो
भयपदः ४ सहपूर्वपदः ५ कर्मव्यतिहारलक्षणः ६ दिगंतराललक्षण
श्चेति सप्तधा बहुव्रीहिर्भवति तत्र द्विपदो यथा आरूढो वानरो यं वृक्षं स आ
रूढवानरो वृक्षः निर्जितः कामो येन सः निर्जितकाम उपनीतं भोजनं यस्मै

५ 6

समुपनीतभोजनो ब्राह्मणः निष्क्रान्तो जनो यस्मात्तन्निष्क्रान्तजनं नगरम्
पीतमम्बरं यस्य सः पीताम्बरो हरिः उषितो विभवो यस्मिन्स उषितविभवो
ग्रामः बहुपदो यथा पराक्रमेणोपार्जिताः सम्पदो येन सः पराक्रमोपार्जि
तसंपदः संख्योत्तरपदो यथा उपदशानामिमे पुरुषाः उपदशाः संख्योभय
पदो यथा द्वौ त्रयो वा द्वित्राः सहपूर्वपदो यथा सह मूलेन उद्धृतः समूलो
द्धृतस्तरुः कर्मव्यतिहारलक्षणो यथा केशाकेशि गृहीत्वा इदं युद्धं प्रवर्त्तते
इति केशाकेशि युद्धं दिगन्तरालक्षणो यथा दक्षिणस्याश्च पूर्वस्या
श्च दिशो यदन्तरालं सेयं दक्षिणपूर्वा दिक् संख्यापूर्वो द्विगुः स च द्विविधः
एकवद्भावी अनेकवद्भावी चेति एकवद्भावी द्विगुर्यथा त्रीणि अं

५

साभिसमाहृतानि त्रिभ्रंगाम् त्रयाणां लोकानां समाहारस्त्रिलोकी अनेक
वद्धावीद्विगुर्यथा चतस्त्रो दिशः चतुर्दिशः त्रयो लोकास्त्रिलोकाः द्वंद्वश्च
तुर्विधः समुच्चयः अन्वाचयः समाहारः इतरेतरयोगश्चेति तत्र समुच्चया
न्वाचययोः समासो नास्ति समुच्चयो यथा देवदत्तः पचति यज्ञदत्तश्च अन्वा
चयो यथा वटो भिक्षामट गां चानय समाहारद्वंद्वो यथा शंखश्च पटहश्च श
खपटहं इतरेतरयोगो यथा रामश्च लक्ष्मणश्च रामलक्ष्मणौ युधिष्ठि
रश्च भीमश्च अर्जुनश्च युधिष्ठिरभीमार्जुनाः अव्ययीभावो द्विविधः ना
मपूर्वपदोऽव्ययपूर्वपदश्चेति तत्र पूर्वपदो यथा अस्तपत्रं किंचिच्छाके
शाकप्रति अव्ययपूर्वपदो यथा कुंभस्य समीपमुपकुंभम् यथाविधि अ

धिहरिइत्यादि तेषामिति पुनस्तेषां समासानां त्रान्त्यं चतुर्विधं स्यात् पूर्वप
दार्थप्रधानः उत्तरपदार्थप्रधानः [illegible] अन्यपदार्थप्रधानश्चेति तत्पुरु
षो द्विप्रधानः पूर्वपदार्थप्रधानः उत्तरपदार्थप्रधानश्चेति तत्र पूर्वपदा
र्थप्रधानो यथा प्राप्तजीविकः उत्तरपदार्थप्रधानो यथा राजपुरुषः कर्मधारयो
द्विप्रधानः पूर्वपदार्थप्रधानः उत्तरपदार्थप्रधानश्चेति तत्र पूर्वो यथा पुरुषर्ष
भः परो यथा नीलोत्पलम् बहुव्रीहिर्द्विविधः उभयपदार्थप्रधानो ऽन्यपदार्थ
प्रधानश्च आद्यो यथा द्वित्राः द्वितीयो यथा चित्रगुर्देवदत्तः द्वन्द्वः उभयपदार्थ
प्रधानः यथा रामलक्ष्मणौ द्विगुरुत्तरपदार्थप्रधान एव यथा त्रिसंगमम् अव्य
यीभावस्त्रिविधः पूर्वपदार्थप्रधानः उत्तरपदार्थप्रधानः अन्यपदार्थप्रधान

मेधावी स्रग्वी युस्तु यथा ऊर्णा ऽस्यास्तीति ऊर्णायुः ग्मिनि यथा वागस्यास्ती
ति वाग्मी आलच् यथा यो वहु संमतं भाषते स वाचालः आलच् यथा यो
वहु संमतं भाषते स वाचाटः इनच् यथा फलान्यस्य फलिनः वर्हिणः आर
२ कन् यथा शृंगमस्यास्तीति शृंगारकः वृंदमस्तीति वृंदारकः आलु-- च
यथा शीतं सहते इति शीतालुः उष्णालुः त्रयालुः चूलो यथा वलं न सह
ते इति वलूनः ऊलो यथा वातानां समूहो वातूलः अण यथा वशिष्ठस्या
पत्यं पुमान् वाशिष्ठः जनपदोऽस्य निवासः जानपदः व्याकरणमधीते वे
त्ति वा वैयाकरणः क्रममधीते वेत्ति वा क्रमकः पदकः खङ् यथा प्रियंगूनां
भवनं क्षेत्रं प्रैयंगवीनम् मौद्गीनम् कौद्रवीणम् अङ् यथा पांचालस्याप

त्यंपुमान् पांचालः वैदेहः इञ्‌प्रत्ययात् दशरथस्यापत्यंपुमान् दासरथिः फ
क्‌प्रत्ययात् नडायनः आश्वलायनः यञ्‌प्रत्ययात् गर्गस्यापत्यंपुमान् गार्ग्यः
ढक्‌प्रत्ययात् गंगाया अपत्यंपुमान् गांगेयः वैनतेयः आञ्जनेयः ऐरक्‌
प्रत्ययात् चटकाया अपत्यंपुमान् चाटकैरः एरक्‌प्रत्ययात् गोधाया अपत्यंपुमा
न् गौधेरः आरक्‌प्रत्ययात् गोधाया अपत्यंपुमान् गौधारः घ प्रत्ययात् क्षत्र
स्यापत्यंपुमान् क्षत्रियः ख प्रत्ययात् कुलस्यापत्यं कुलीनः ण्य प्रत्ययात् कु
रोरपत्यंपुमान् कौरव्यः यञ्‌प्रत्ययात् मूर्द्धि भवा मूर्द्धन्यः उरस्यः दंत्यः इ प्रत्य
यात् उद्गतो गंधो यस्य स उद्गंधिः पूतिगंधिः सुगंधिः इतच् प्रत्ययात् कुसु
मान्यस्य संजातानि कुसुमितो वृक्षः अनङ्‌प्रत्ययात् पुष्पमेव धनुर्यस्य स

(ख)

श्चेति तत्र प्रथमो यथा उपकुंभं मृत्तिकेति द्वितीयो यथा शाकप्रतीति तृतीयो यथा उन्मत्तगंगं देशः इति समासः अथ तद्धितप्रत्ययाः सामान्येति सामान्यवृत्तिः अव्ययसंज्ञः भाववाचक श्चेति त्रिविधस्तद्धितप्रत्ययः अनेकेषां परस्परसमर्थानां पदानां प्रथमादेव पदात्प्रसूयते तत्र सामान्यवृत्तिः मतुप १ त्वच् २ इलच् ३ श ४ न ५ ण ६ उरच् ७ र ८ व ९ वलच् १० इनिः ११ ठन् १२ विनिः १३ युस् १४ ग्मिनिः १५ अलच् १६ आठच् १७ इनित् १८ आरकन् १९ आलुच् २० चूलः २१ ऊलः २२ आण २३ वन् २४ खडु २५ अडु २६ इडु २७ फक् २८ यडु २९ ठक् ३० औरक् ३१ एरक् ३२ आरकः ३३ त्व ३४ ख ३५ एप ३६ यत ३७ इत ३८ इतच् ३९ अनडु ४० चंचुप ४१ चणप् ४२ इष्टन् ४३

६ ईयसुन् ४४ तरप् ४५ तमप् ४६ कल्पप् ४७ देश्यः ४८ देशीयर् ४९ जातीयर् ५०
१ द्वयसट् ५१ दघ्नट् ५२ मात्रट् ५३ तयप् ५४ टक् ५५ इत्यादि मतुप् यथा गुणो ऽ
स्यास्तीति गुणवान् गुणवती गुणवत् लच् यथा चूडा ऽस्यास्तीति चूडालः वत्सं काम
यते वत्सलः अंसलः इलच् यथा फेनो ऽस्यास्तीति फेनिलः तुंदिलः शयथा ला
लामान्यस्य संतीति मशः नयथा वामो ऽस्यास्तीति वामनः णयथा प्रज्ञा ऽस्यास्ती
ति प्राज्ञः श्राद्धः आर्चः वृत्तिरस्यास्तीति वार्त्तः उरच् यथा दंतो ऽन्नता ऽस्य
संतीति दंतुरः रयथा मधु अस्यास्तीति मधुरः वयथा केशा अस्य संतीति केशवः
वलच् यथा रजो ऽस्यास्तीति रजस्वलः इनिर्यथा धनमस्यास्तीति धनी ठन् य
था धनमस्यास्तीति धनिकः विनिर्यथा यशो ऽस्यास्तीति यशस्वी मायावी ६